शूद्रोऽपि तैः समं वत्स ! कुरुते ह्यभिभाषणम् ।
ददात्यभीप्सितान् कामान् हरश्चिन्तामणिर्यथा ।
कार्त्तिके मुनिपुष्पेण पूजितो गरुड़ध्वजः ॥
गवामयुतदानेन यत्फलं कार्त्तिके मुने ! ।
मुनिपुष्पेण चैकेन कार्त्तिक्यां तत् फलं स्मृतम् ॥
येऽर्च्चयन्ति सुराध्यक्षं करवीरैः सितासितैः ।
तेषां वर्षशतं यावत् प्रसुर्भवति केशवः ॥
वकुलाशोककुसुमैर्येऽर्च्चयन्ति जगत्पतिम् ।
निःशङ्कास्ते भवन्तीह यावच्चन्द्रदिवाकरौ ॥
अशोककुसुमै रम्यैर्जन्मशोकभयापहम् ।
पूजयित्वा हरिं याति पदं विष्णोरनामयम् ॥
शुभगन्धैः सितैर्वत्स ! कुसुमैः पङ्कजोद्भवैः ।
अधोक्षजं समभ्यर्च्य नरो याति हरेः पदम् ॥
अभ्यर्च्य कौसुमैः पुष्पैः केशवं क्लेशनाशनम् ।
प्रयाति भवनं विष्णोर्व्वन्दितं त्रिदशैरपि ॥
अटरूषकपुष्पैश्च पूजयेद्यो जगत्पतिम् ।
स पुण्यवान्नरो याति तद्विष्णोः परमं पदम् ॥
कार्त्तिके योऽर्च्चयेद्विष्णुं तुलसीविल्वपङ्कजैः ।
त्रिदशैरपि पूज्यः स न शक्यो यमकिङ्करैः ॥
माधवे योऽर्च्चयेद्विष्णुं तुलसीविल्वपङ्कजैः ।
त्रिदशैरपि पूज्यः स वक्तुं शक्यो न किङ्करैः ॥
माधवे योऽर्च्चयेद्विष्णुं सुपुष्पैस्तिलकोद्भवैः ।
धूतपापो निरातङ्कः स विष्णोर्याति तत् पदम् ॥
समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् ।
शूद्रोपनीतैश्च हरेः पूजां कुर्व्वन् व्रजत्यधः ॥
तस्माद्द्विजो मुनिश्रेष्ठ ! शिष्येण स्वयमेव वा ।
पुष्पादीनि समाहृत्य पूजयेत् परमेश्वरम् ॥
विप्रो दूर्व्वामयैः पुष्पैस्तथा काशकुशोद्भवैः ।
तुलसीविल्वपत्रैश्च पूजयेद्देवताः पितॄन् ॥
नार्च्चयेत्तगरैः सूर्य्यं धूर्त्तपुष्पेण केशवम् ।
देवीं लकुचपुष्पैश्च शङ्करं नागकेशरैः ॥"
कालविशेषे तस्य पर्य्युषितत्वं यथा,—
"प्रहरं तिष्ठते जाती प्रहरार्द्धन्तु मल्लिका ।
त्रियामं मुनिपुष्पञ्च करवीरमहर्निशम् ॥"
आम्रमञ्जरीविल्वपत्रदानफलं यथा,—
"मञ्जरीं सहकारस्य ये प्रयच्छन्ति वैष्णवाः ।
कार्त्तिके सफलास्ते स्युर्गोकोटिफलभागिनः ॥
कार्त्तिके योऽर्च्चयेद्भक्त्या विल्वपत्रेण केशवम् ।
ददात्ययुतफलं केशवस्तस्य वै मुने ! ॥
विल्वपत्रेण ये लक्ष्यां कार्त्तिके कलिमर्द्दनम् ।
पूजयन्ति महाभागा मुक्तिस्तेषां करे स्थिता ॥
नागकेशरपुष्पैर्यैः पूजयेद्गरुड़ध्वजम् ।
स याति वैष्णवं स्थानं यत्र गत्वा न शोचते ॥
कदम्बकुसुमैर्यो वै पूजयेन्मधुसूदनम् ।
जन्मायुतार्ज्जितं पापं स्फोटितं तेन नारद ! ॥
न तथा केतकीपुष्पैर्मालतीकुसुमैस्तथा ।
तोषमायाति देवेशः कदम्बकुसुमैर्यथा ॥
दृष्ट्वा कदम्बपुष्पाणि तोषमायाति माधवः ।
किं पुनः पूजितो देवः सर्व्वकामप्रदो हरिः ॥
हरिं किंशुकपुष्पैर्यः पूजयेत्त्रिदशाधिपम् ।
वैकुण्ठे रमते शश्वत् विष्णुना सह वैष्णवः ॥
वर्षाकाले च देवेशं कुसुमैश्चन्दनार्च्चितैः ।
योऽर्च्चयेत् परमं विष्णुं संसारे न पुनर्व्विशेत् ॥
कुन्दपुष्पैश्च विप्रर्षे ! योऽर्च्चयेद्गरुड़ध्वजम् ।
कोटिजन्मार्ज्जितं पापं तत्क्षणादेव नश्यति ॥
शमीपुष्पैश्च देवेशं पूजयेदसुरद्विषम् ।
यमं न पश्येद्विप्रर्षे ! न याति दुर्गतिं नरः ॥"
इति पाद्मोत्तरखण्डे १३१ अध्यायः ॥ * ॥
लक्ष्मीतुल्यप्रियपुष्पाणि यथा, नारदीयसप्तम-सहस्रे ।
"मालतीवकुलाशोकशेफालिनवमालिकाः ।
अम्लानतगराङ्कोठमल्लिकामधुपिण्डिकाः ॥
यूथिमष्टापदं कुन्दं कदम्बं मधुपिप्पलम् ।
पाटला चम्पकं लक्ष्यं लवङ्गमतिमुक्तकम् ॥
केतकं कुरवकं विल्वं कह्लारकरकं द्विजम् ।
पञ्चविंशतिपुष्पाणि लक्ष्मीतुल्यप्रियाणि मे ॥"
केशवार्च्चने निषिद्धपुष्पाणि यथा, विष्णुधर्म्मोत्तरे ।
"उग्रगन्धीन्यगन्धीनि कुसुमानि न दापयेत् ।
अन्यायतनजातानि कण्टकीनि तथैव च ॥
रक्तानि यानि धर्म्मज्ञ ! चैत्यवृक्षोद्भवानि च ।
श्मशानजातान्यन्यानि यानि चाकालजानि च ॥"
तथा ।
"कुटजं शाल्मलीपुष्पं शिरीषञ्च जनार्द्दने ।
निवेदितं भयं रोगं निःस्वत्वञ्च प्रयच्छति ॥
बन्धुजीवकपुष्पाणि रक्तान्यपि च दापयेत् ।
अनुक्तरक्तकुसुमदानात् दौर्भाग्यमाप्नुयात् ॥"
परारोपितवृक्षस्य पुष्पग्रहणे दोषः । अगस्त्यः ।
"परारोपितवृक्षेभ्यः पुष्पाण्यानीय योऽर्च्चयेत् ।
अविज्ञाप्य च तस्यैव निष्फलं तस्य पूजितम् ॥"
एतद्द्विजेतरपरम् ।
"द्विजस्तृणैधःपुष्पाणि सर्व्वतः स्ववदाहरेत् ॥"
इति याज्ञवल्क्यात् ।
"देवार्थञ्च कुसुममस्तेयं मनुरब्रवीत् ॥"
इति वचनात् ।
"गोऽर्थार्थे तृणमेधांसि वीरुद्वनस्पतीनाम् ।
पुष्पाणि स्ववदाददीत फलानि चापरिवृत्ति-तानि ॥".
इति गौतमवचनाच्च ।
द्विजेतरस्य दक्षोऽपि ।
"तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम् ।
अप्रयच्छन्नियच्छानो हस्तच्छेदनमर्हति ॥"
इति स्मृतेः ॥ * ॥
देवोपरि धृतं मस्तकोपरि धृतं अधोवस्त्रधृतं जलमध्यक्षालितञ्च पुष्पं दुष्टमिति हरिभक्ति-नामके ग्रन्थे । अभिवाद्याभिवादककरस्थपुष्पं प्रोक्षणात् कर्म्मण्यम् । इति केचित् ॥ * ॥
याचितादिपुष्पदानस्य निष्फलत्वम् । याचितं निष्फलं पुष्पं क्रयक्रीतञ्च निष्फलमिति वदन्ति ।
वामहस्तचितादिपुष्पस्यादेयत्वं यथा,—
"न पुष्पच्छेदनं कार्य्यं देवार्थे वामहस्ततः ।
न दद्यात्तानि देवेभ्यः संस्थाप्य वामहस्ततः ॥"
समित्पुष्पादीनां स्वयमाहरणीयत्वं हारीत-शातातपौ ।
"समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत् ।
शूद्रानीतैः क्रयक्रीतैः कर्म्म कुर्व्वन् पतत्यधः ॥"
क्रये प्रतिप्रसवमाह ब्रह्मपुराणम् ।
"पुष्पैर्धूपैश्च नैवेद्यैर्वीरक्रयक्रियाहृतैः ॥"
वीरक्रयो वीरवत् याच्ञाशून्येन विक्रेतुरुपन्यस्त-मूल्येन क्रयः ॥ * ॥ पुष्पदानप्रकारो ज्ञान-मालायाम् ।
"पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम् ।
पुष्पाञ्जलिविधिं हित्वा यथोत्पन्नं तथार्पणम् ॥"
मध्याह्नस्नानानन्तरं पुष्पचयनस्य दोषो यथा,—
"स्नानं कृत्वा तु ये केचित् पुष्पं गृह्णन्ति वै द्विजाः ।
देवतास्तन्न गृह्णन्ति भस्मीभवति दारुवत् ॥"
एतत्तु द्वितीयस्नानाभिप्रायम् । इति रत्नाकरः ॥
यत्तं मत्स्यसूक्ते ।
"स्नात्वा मध्याह्नसमये न छिन्द्यात् कुसुमं नरः ।
तत्पुष्पस्यार्पणे देवि ! रौरवे परिपच्यते ॥"
पुष्पाभावे देयानि यथा, विष्णुधर्म्मोत्तरे ।
"पुष्पाभावेऽपि देयानि पत्राणि च जनार्द्दने ।
पत्राभावे जलं दद्यात्तेन पुण्यमवाप्यते ॥" * ॥
पुष्पदानमाहात्म्यं यथा,—
"न रत्नैर्न सुवर्णेन न वित्तेन च भूरिणा ।
तथा प्रसादमायाति यथा पुष्पैर्जनार्द्दनः ॥ * ॥
देवताविशेषे वर्ज्जनीयपुष्पं यथा, शातातपः ।
"शिवे विवर्ज्जयेत् कुन्दमुन्मत्तञ्च हरेस्तथा ।
देवीनामर्कमन्दारौ सूर्य्यस्य तगरन्तथा ॥" *
पुष्पविशेषाणां कालिकपर्य्युषितत्वम् । भविष्ये ॥
"पद्मानि सितरक्तानि कुमुदान्युत्पलानि च ।
एषां पर्य्युषिताशङ्का कार्य्या पञ्चदिनोत्तरम् ॥"
पुष्पविशेषस्यापर्य्युषितत्वं यथा,—
"तुलस्यगस्त्यविल्वानां न च पर्य्युषितात्मता ॥"
योगिनीतन्त्रे ।
"विल्वपत्रञ्च माध्यञ्च तमालामलकीदलम् ।
कह्लारं तुलसीचैव पद्मञ्च मुनिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यच्चान्यत् कलिका-त्मकम् ॥"
कलिकात्मकं प्रस्फुटनयोग्यम् । इत्येकादशी-तत्त्वम् ॥ राघवभट्टमते पुष्पविशेषाणां कालिक-पर्य्युषितत्वं यथा,
"विल्वापामार्गजातीतुलसिशमिशताकेतकीभृङ्ग-दूर्व्वा
मन्दाम्भोजाद्रिदर्भा मुनितिलतगरब्रह्मकह्लार-मल्ली ।
चम्पाश्वरातिकुम्भीदमनमरुवका विल्वतो-ऽहानि शस्ता-
स्त्रिंशत्षड्रत्रकार्क्करीशोनिधिनिधि-वसु-भू-भू-यमा भूय एवम् ॥"
अस्यार्थः । शता शतावरी । मन्दः मन्दारः । अद्रिर्नागकेशरः । मुनिरगस्त्यः । अश्वारातिः करवीरः । कुम्भी पाटला । विल्वमारभ्य अद्रि-पर्य्यन्तं गणयित्वा दर्भमारभ्य पुनस्त्रिंशदादि गणयेत् । एतद्दिनोत्तरं पर्य्युषितानीत्यर्थः । इति पदार्थादर्शः ॥ * ॥ पुष्पक्रीड़ायां वर्ज्जनीयानि यथा,